# [२९] श्री संस्तारक (प्रकीर्णक)सूत्रम्

**नमो नमो निम्मलदंसणस्स**

पूज्य श्रीआनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नम:

# “संस्तारक” मूलं एवं छाया

**[मूलं एवं संस्कृतछाया]**

[आद्य संपादक: - पूज्य आगमोद्धारक आचार्यदेव श्री आनंदसागर सूरीश्वरजी म. सा.]

(किञ्चित् वैशिष्ठ्यं समर्पितेन सह)

पुन: संकलनकर्ता→ मुनि दीपरत्नसागर (M.Com., M.Ed., Ph.D.)

15/01/2015, गुरुवार, २०७१ पौष कृष्ण १०

jain_e_library's Net Publications

**मुनि दीपरत्नसागरेण संकलित......आगमसूत्र-[२९], प्रकीर्णकसूत्र-[६] “संस्तारक” मूलं एवं संस्कृतछाया**

| आगम (२९) | “संस्तारक” - प्रकीर्णकसूत्र-६ (मूलं+संस्कृतछाया) <br> ---------------------------------------- मूलं [-] ---------------------------------------- |
|---|---|
| प्रत सूत्रांक [–] <br><br> दीप अनुक्रम [–] | मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२९], प्रकीर्णकसूत्र - [०६] “संस्तारक” मूलं एवं संस्कृतछाया <br><br> ‘संस्तारक’ प्रकीर्णक(६) <br><br> श्रीआगमोदयसमितिग्रन्थोद्धारे, पूर्वमुद्रितग्रन्थाङ्कः–४५, अयं–ग्रन्थाङ्कः–४६. <br> श्रुतस्थविरसूत्रितं । <br> चतुःशरणादिमरणसमाध्यन्तं प्रकीर्णकदशकं (छायायुतम्) । <br> प्रकाशकः—श्रीआगमोदयसमितेः कार्यवाहकः झवेरी–वेणीचंद सूरचंद । <br> इदं पुस्तकं मोहमय्यां निर्णयसागरमुद्रणालये कोलभाटवीथ्यां–२६–२८ तमे गृहे <br> रामचंद्र येसू शेडगेद्वारा मुद्रापयित्वा प्रकाशितम् । <br> वीर सं० २४५३. विक्रम सं० १९८३. सन १९२७. [ वेतनं रू. २–०–०. |
| | संस्तारक-प्रकीर्णकसूत्रस्य मूल “टाइटल पेज” |

# 'संस्तारक' प्रकीर्णकसूत्रस्य विषयानुक्रम



| मूलांक: | गाथा | पृष्ठांक: | मूलांक: | गाथा | पृष्ठांक: | मूलांक: | गाथा | पृष्ठांक: |
|---|---|---|---|---|---|---|---|---|
| ००१ | मङ्गलं, संस्तारकगुणा: | ००४ | ०३१ | संस्तारकस्वरुपम्, लाभं | ००७ | ०५६ | संस्तारकस्य द्रष्टांता: | ०११ |
| ८९-१३३ | भावना | ०१६ | ----- | ---------- | ----- | ----- | ---------- | ----- |

## ['संस्तारक' - मूलं एवं संस्कृतछाया] इस प्रकाशन की विकास-गाथा

यह प्रत सबसे पहले "चतु:शरणादिमरणसमाध्यन्तं प्रकीर्णकदशकं" नामसे सन १९२७ (विक्रम संवत १९८३) में आगमोदय समिति द्वारा प्रकाशित हुई, संपादक-महोदय थे पूज्यपाद आगमोद्धारक आचार्यदेव श्री आनंदसागरसूरीश्वरजी (सागरानंदसूरिजी) महाराज साहेब | इस प्रतमे १० प्रकीर्णक थे.

इसी प्रत को फिर से दुसरे पूज्यश्रीओने अपने-अपने नामसे भी छपवाई, जिसमे उन्होंने खुदने तो कुछ नहीं किया, मगर इसी प्रत को ऑफसेट करवा के, अपना एवं अपनी प्रकाशन संस्था का नाम छाप दिया. जिसमे किसीने पूज्यपाद् सागरानंदसूरिजी के नाम को आगे रखा, और अपनी वफादारी दिखाई, तो किसीने स्वयं को ही इस पुरे कार्य का कर्ता बता दिया और संपादकपूज्यश्री तथा प्रकाशक का नाम ही मिटा दिया |

✤ **हमारा ये प्रयास क्यों?** ✤ आगम की सेवा करने के हमें तो बहोत अवसर मिले, **४५-आगम सटीक** भी हमने ३० भागोमे १२५०० से ज्यादा पृष्ठोमें प्रकाशित करवाए है किन्तु लोगो की पूज्य श्री सागरानंदसूरीश्वरजी के प्रति श्रद्धा तथा प्रत स्वरुप प्राचीन प्रथा का आदर देखकर हमने इसी प्रत को स्केन करवाई, उसके बाद एक **स्पेशियल फोरमेट** बनवाया, जिसमे बीचमे पूज्यश्री संपादित प्रत ज्यों की त्यों रख दी, ऊपर **शीर्षस्थानमे** आगम का नाम, फिर मूलसूत्र या गाथा के क्रमांक लिख दिए, ताँकि पढ़नेवाले को प्रत्येक पेज पर कौनसा सूत्र या गाथा चल रहे है उसका सरलता से ज्ञान हो शके, बायीं तरफ **आगम** का **क्रम** और इसी **प्रत** का **सूत्रक्रम** दिया है, उसके साथ वहाँ **'दीप अनुक्रम'** भी दिया है, जिससे हमारे प्राकृत, संस्कृत, हिंदी गुजराती, इंग्लिश आदि सभी आगम प्रकाशनोमें प्रवेश कर शके | हमारे अनुक्रम तो प्रत्येक प्रकाशनोमें एक सामान और क्रमशः आगे बढते हुए ही है, इसीलिए सिर्फ क्रम नंबर दिए है, मगर प्रत में गाथा और सूत्रो के नंबर अलग-अलग होने से हमने जहां सूत्र है वहाँ **कौंस [-]** दिए है और जहां गाथा है वहाँ **||-||** ऐसी **दो लाइन** खींची है या फिर गाथा शब्द लिख दिया है |

हमने एक अनुक्रमणिका भी बनायी है, जिसमे प्रत्येक अध्ययन आदि लिख दिये है और साथमें इस सम्पादन के पृष्ठांक भी दे दिए है, जिससे अभ्यासक व्यक्ति अपने चहिते अध्ययन या विषय तक आसानी से पहुँच शकता है | अनेक पृष्ठ के नीचे **विशिष्ठ फूटनोट** भी लिखी है, जहां उस पृष्ठ पर चल रहे ख़ास विषयवस्तु की, मूल प्रतमें रही हुई कोई-कोई मुद्रण-भूल की या क्रमांकन-भूल सम्बन्धी जानकारी प्राप्त होती है |

अभी तो ये jain_e_library.org का 'इंटरनेट पब्लिकेशन' है, क्योंकि विश्वभरमें अनेक लोगो तक पहुँचने का यहीं सरल, सस्ता और आधुनिक रास्ता है, आगे जाकर ईसि को मुद्रण करवाने की हमारी मनीषा है|

**......मुनि दीपरत्नसागर.....**

| आगम (२९) | “संस्तारक” - प्रकीर्णकसूत्र-६ (मूलं+संस्कृतछाया)<br>---------------------------------------- मूलं [१]---------------------------------------- |
| --- | --- |
| प्रत सूत्रांक ॥१॥<br>दीप अनुक्रम [१] | (see text below) |
| | भगवंत वीर वंदना, अथ संस्तारकस्य महत्ता वर्णयते |

५ तंदुलवैचारिके ॥ ५३ ॥

संस्तारकस्य महत्ता

काऊण नमुक्कारं जिणवरवसहस्स वद्धमाणस्स । संथारंमि निबद्धं गुणपरिवाडिं निसामेह ॥ १ ॥ ५८७ ॥
एस किराराहणया एस किर मणोरहो सुविहिआणं । एस किर पच्छिमंते पडागहरणं सुविहिआणं ॥ २ ॥
॥ ५८८ ॥ भूईगहणं जह नक्कयाण अवमाणयं अवज्झा(वऽज्झा)णस्स । मल्लाणं च पडागा तह संथारो सुविहि-
आणं ॥ ३ ॥ ५८९ ॥ पुरिसवरपुंडरीओ अरिहा इव सव्वपुरिससीहाणं । महिलाण भगवईओ जिणजणणीओ
जयंमि जहा ॥ ४ ॥ ५९० ॥ वेरुलिउव्व मणीणं गोसीसं चंदणं व गंधाणं । जह व रयणेसु वइरं तह संथारो
सुविहिआणं ॥ ५ ॥ ५९१ ॥ वंसाणं जिणवंसो सव्वकुलाणं च सावयकुलाइं । सिद्धिगई व गईणं मुत्तिसुहं
सव्वसुक्खाणं ॥ ६ ॥ ५९२ ॥ धम्माणं च अहिंसा जणवयवयणाण साहुवइणाइं । जिणवयणं च सुईणं सुद्धीणं
दंसणं च जहा ॥ ७ ॥ ५९३ ॥ कल्लाणं अब्भुदओ देवाणं दुल्लहं तिहुअणंमि । वत्तीसं देविंदा जं तं झायंति

कृत्वा नमस्कारं जिनवरवृषभाय वर्धमानाय । संस्तारके निबद्धां गुणपरिपाटीं निशमय ॥ १ ॥ एषा किलाराधना एष किल मनोरथः
सुविहितानां । एतत् किल पश्चिमान्ते पताकाहरणं सुविहितानाम् ॥ २ ॥ भूतिग्रहणं यथा दरिद्राणां(!) अपमानश्चापध्यानस्य । मल्लानां च
पताका तथा संस्तारः सुविहितानाम् ॥ ३ ॥ सर्वपुरुषसिंहानां पुरुषवरपुण्डरीकोऽर्हन्निव । महिलानां यथा भगवत्यो जिनजनन्यो जयन्ति
(तथाऽयं) संस्तारः ॥ ४ ॥ वैडूर्यो मणीनामिव गोशीर्षं चन्दनमिव गन्धानाम् । रत्नेषु यथा वा वज्रं तथा संस्तारः सुविहितानाम्
॥ ५ ॥ वंशानां जिनवंशः सर्वकुलानां च श्रावककुलानि । गतीनां सिद्धिगतिरिव सर्वसौख्यानां मुक्तिसुखम् ॥ ६ ॥ धर्माणां चाहिंसा ॥ ५३ ॥
जनपदवचनानां साधुवचनानि । श्रुतीनां च जिनवचनं यथा च शुद्धीनां दर्शनम् ॥ ७ ॥ कल्याणमभ्युदयो देवानां दुर्लभं त्रिभुवने ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||८||

दीप अनुक्रम [८]

एगमणा ॥ ८ ॥ ५९४ ॥ लद्धं तु तए एयं पंडिअमरणं तु जिणवरक्खायं । हंतूण कम्ममल्लं सिद्धिपडागा तुमे लद्धा ॥ ९ ॥ ५९५ ॥ झाणाण परमसुक्कं नाणाणं केवलं जहा नाणं । परिनिव्वाणं च जहा कमेण भणिअं जिणवरेहिं ॥ १० ॥ ५९६ ॥ सव्वुत्तमलाभाणं सामन्नं चेव लाभ मन्नंति । परमुत्तम तित्थयरो परमगई परमसिद्धुत्ति ॥ ११ ॥ ५९७ ॥ मूलं तह संजमो वा परलोगरयाण किलिट्ठकम्माणं । सव्वुत्तमं पहाणं सामन्नं चेव मन्नंति ॥ १२ ॥ ५९८ ॥ लेसाण सुक्कलेसा निअमाणं बंभचेरवासो अ । गुत्तिसमिई गुणाणं मूलं तह संजमोवाओ ॥ १३ ॥ ५९९ ॥ सव्वुत्तमतित्थाणं तित्थयरपयासिअं जहा तित्थं । अभिसेउव्व सुराणं तह संथारो सुविहियाणं ॥ १४ ॥ ६०० ॥ सिअकमलकलससत्थिअनंदावत्तवरमल्लदामाणं । तेसिंपि मंगलाणं संथारो मंगलं अहिअं ॥ १५ ॥ ६०१ ॥ तवअग्गिनियमसूरा जिणवरनाणा विसुद्धपत्थयणा । जे निव्वहंति पुरिसा

द्वात्रिंशद्देवेन्द्रा यत्तद्ध्यायन्त्येकमनसः ॥ ८ ॥ लब्धं तु त्वयैतत् पण्डितमरणं तु जिनाख्यातम् । हत्वा कर्ममल्लं सिद्धिपताका त्वया लब्धा ॥ ९ ॥ ध्यानानां परमशुक्लं ज्ञानानां केवलं यथा ज्ञानम् । परिनिर्वाणं च यथा क्रमेण भणितं जिनवरेन्द्रैः ॥ १० ॥ सर्वोत्तमलाभानां श्रामण्यमेव लाभं मन्यन्ते । परमोत्तमस्तीर्थकरः परमगतिः परमसिद्ध इति ॥ ११ ॥ मूलं तथा संयमो वा परलोकरतानां क्लिष्टकर्मणाम् । सर्वोत्तमं प्रधानं श्रामण्यं चैव मन्यन्ते ॥ १२ ॥ लेश्यानां शुक्ललेश्या नियमानां ब्रह्मचर्यवासश्च । गुप्तिसमितयो गुणानां मूलं तथा संयमोपायः ॥ १३ ॥ सर्वोत्तमतीर्थानां तीर्थकरप्रकाशितं यथा तीर्थम् । अभिषेक इव सुराणां तथा सुविहितानां संस्तारकः ॥ १४ ॥ सितकमलकलशस्वस्तिकनन्द्यावर्त्तवरमाल्यदामभ्यः । तेभ्योऽपि मङ्गलेभ्यः संस्तारकोऽधिकं मङ्गलम् ॥ १५ ॥ तपोऽग्निनियम-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| आगम (२९) | “संस्तारक” - प्रकीर्णकसूत्र-६ (मूलं+संस्कृतछाया)<br>------------------------------------- मूलं [१६]------------------------------------- |
|---|---|
| प्रत<br>सूत्रांक<br>\|\|१६\|\|<br><br>दीप<br>अनुक्रम<br>[१६] | ६ संथारय-पइण्णयं<br>॥ ५४ ॥<br><br>संथारगइंदमारूढा ॥ १६ ॥ ६०२ ॥ परमट्ठो परमउलं परमाययणंति परमकप्पुत्ति । परमुत्तमतित्थयरो परम-गई परमसिद्धित्ति ॥ १७ ॥ ६०३ ॥ ता एअं तुमि लद्धं जिणवयणामयविभूसिअं देहं । धम्मरयणंसिआ ते (०णस्सिया ०णामया) पडिआ भवणंमि वसुहारा ॥ १८ ॥ ६०४ ॥ पत्ता उत्तमपुरिसा कल्लाणपरंपरा पर-मदिव्वा । पावयण साहु धीरं (०धीरा) कयं च ते अज्ज सप्पुरिसा ! ॥ १९ ॥ ६०५ ॥ सम्मत्तनाणदंसणवरर-यणा नाणतेअसंजुत्ता । चारित्तसुद्धसीला तिरयणमाला तुमे लद्धा ॥ २० ॥ ६०६ ॥ सुविहिअगुणवित्थारं संथारं जे लहंति सप्पुरिसा । तेसिं जिअलोगसारं रयणाहरणं कयं होइ ॥ २१ ॥ ६०७ ॥ तं तित्थं तुमि लद्धं जं पवरं सव्वजीवलोगंमि । ण्हाया जत्थ मुणिवरा निव्वाणमणुत्तरं पत्ता ॥ २२ ॥ ६०८ ॥ आसव-संवरनिज्जर तिन्निवि अत्था समाहिआ जत्थ । तं तित्थंति भणंती सीलव्वयबद्धसोवाणा ॥ २३ ॥ ६०९ ॥<br><br>शूरा जिनवरज्ञाना विशुद्धपथ्यदनाः। ये पुरुषाः संस्तारकगजेन्द्रमारूढाः (ते) निर्वहन्ति ॥ १६ ॥ परमार्थः परमतुलं(ला)परमायतनमिति परमकल्प इति । परमोत्तमतीर्थकरः परमगतिः परमसिद्ध इति ॥ १७ ॥ तदेतत्त्वया लब्धं जिनवचनामृतविभूषितं शरीरं । धर्मरत्ना-श्रिता तव पतिता भवने वसुधारा ॥ १८ ॥ प्राप्ता उत्तमपुरुषा कल्याणपरम्परा परमदिव्या । प्रवचने साधु धैर्यं कृतं त्वयाऽद्य सत्पुरुष ! ॥ १९ ॥ सम्यक्त्वज्ञानदर्शनवररत्ना नाना(ज्ञान)तेजःसंयुक्ता । चारित्रशीलशुद्धा त्रिरत्नमाला त्वया लब्धा ॥ २० ॥ सुविहितगुणवि-स्तारं संस्तारकं ये लभन्ते सत्पुरुषाः । तैर्जीवलोकसारं रत्नाहरणं कृतं भवति ॥ २१ ॥ तत्तीर्थं त्वया लब्धं यत् प्रवरं सर्व्वजीवलोके । स्नाता यत्र मुनिवरा निर्वाणमनुत्तरं प्राप्ताः ॥ २२ ॥ आश्रवसंवरनिर्जराः त्रयोऽप्यर्थाः समाहिता यत्र । तत्तीर्थमिति भणन्ति शीलव्रत-<br><br>संस्तारकर्त्तु-रनुमोदना<br>॥ ५४ ॥<br><br>Jain Education International For Personal & Private Use Only www.jainelibrary.org |
| | अथ संस्तारक-कर्तु: अनुमोदना क्रियते |

प्रत सूत्रांक ||२४||

दीप अनुक्रम [२४]

भंजिय परीसहचमूं उत्तमसंजमबलेण संजुत्ता। भुंजंति कम्मरहिआ निव्वाणमणुत्तरं रज्जं ॥२४॥६१०॥तिहुअणर-
ज्जसमाहिं पत्तोऽसि तुमं हि(पि) समयकप्पंमि(ति)। रज्जाभिसेयमउलं विउलफलं लोइ विहरंति ॥ २५ ॥६११॥
अभिनंदइ मे हिअयं तुब्भे मुक्खस्स साहणोवाओ । जं लद्धो संथारो सुविहिअ! परमत्थनित्थारो ॥ २६ ॥
॥ ६१२ ॥ देवावि देवलोए भुंजंता बहुविहाइं भोगाइं । संथारं चिंतंता आसणसयणाइं मुंचंति ॥२७॥६१३॥
चंदुव पिच्छणिज्जो सूरो इव तेअसा विदिप्पंतो । धणवंतो गुणवंतो हिमवंतमहंतविक्खाओ ॥ २८ ॥ ६१४ ॥
गुत्तीसमिइउवेओ संजमतवनिअमजोगजुत्तमणो । समणो समाहिअमणो दंसणनाणे अणन्नमणो ॥ २९ ॥
॥ ६१५ ॥ मेरुव्व पव्वयाणं सयंभुरमणुव्व चेव उदहीणं । चंदो इव ताराणं तह संथारो सुविहिआणं ॥ ३० ॥
॥ ६१६ ॥ भण केरिसस्स भणिओ संथारो केरिसे व अवगासे। उक्खंपिगस्स (०भिकस्स) करणं एअं ता

---

बद्धसोपानाः ॥ २३ ॥ भङ्क्त्वा परिषहचमूं उत्तमसंयमबलेन संयुक्ताः । भुञ्जन्ति कर्मरहिता निर्वाणमनुत्तरं राज्यं ॥ २४ ॥ त्रिभुवन-
राज्यसमाधिं प्राप्तोऽसि त्वं हि सर्वकल्पेषु । राज्याभिषेकमतुलं विपुलफलं लोकेऽनुभूतवान् ॥ २५ ॥ अभिनन्दति मे हृदयं त्वया मोक्षस्य
साधनोपायः । यल्लब्धः संस्तारकः सुविहित! परमार्थनिस्तारः ॥ २६ ॥ देवा अपि देवलोके भुञ्जाना बहुविधान् भोगान् । संस्तारकं
चिन्तयन्त आसनशयनानि मुञ्चन्ति ॥ २७ ॥ चन्द्र इव प्रेक्षणीयः सूर्य इव तेजसा विदीप्यमानः । धनवान् गुणवान् हिमवद्वद् महान्
विख्यातः ॥ २८ ॥ गुप्तिसमितिभिरुपेतः संयमतपोनियमयोगयुक्तमनाः । श्रमणः समाहितमनाः दर्शनज्ञानयोरनन्यमनाः ॥ २९ ॥
घ. स. १० मेरुरिव पर्वतानां स्वयम्भूरमण इव उदधीनामेव । चन्द्र इव तारकाणां तथा संस्तारकः सुविहितानाम् ॥ ३० ॥ भण कीदृशस्य भणितः

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||३१||

दीप अनुक्रम [३१]

५ तंदुलवै-
चारिके

॥ ५५ ॥

इच्छिमो नाउं ॥ ३१ ॥ ६१७ ॥ हायंति जस्स जोगा जरा य विविहा य हुंति आयंका । आरुहइ अ संथारं
सुविसुद्धो तस्स संथारो ॥ ३२ ॥ ६१८ ॥ जो गारवेण मत्तो निच्छइ आलोअणं गुरुसगासे । आरुहइ अ
संथारं अविसुद्धो तस्स संथारो ॥ ३३ ॥ ६१९ ॥ जो पुण पत्तब्भूओ करेइ आलोअणं गुरुसगासे । आरुहइ
अ० सुवि० ॥ ३४ ॥ ६२० ॥ जो पुण दंसणमइलो सिढिलचरित्तो करेइ सामन्नं । आरु० अवि० ॥ ३५ ॥
॥ ६२१ ॥ जो पुण दंसणसुद्धो आयचरित्तो करेइ सामन्नं । आरु० सुवि० ॥ ३६ ॥ ६२२ ॥ जो रागदोसर-
हिओ तिगुत्तिगुत्तो तिसल्लमयरहिओ । आरुहइ० सुवि० ॥ ३७ ॥ ६२३ ॥ तिहिं गारवेहिं रहिओ तिदंड-
पडिमोयगो पहिअकित्ती । आरुहइ० सुवि० ॥ ३८ ॥ ६२४ ॥ चउविहकसायमहणो चउहिं विकहाहिं विर-

शुद्धाशुद्ध-
संस्तारकौ

---

संस्तारकः ? कीदृशे वाऽवकाशे ? । उत्स्कन्दितस्य ( अनशनस्य ) करणमेतत् तावदिच्छामो ज्ञातुम् ॥ ३१ ॥ हीयंते यस्य योगा जरा च
विविधाश्च भवन्त्यातङ्काः । आरोहति च संस्तारकं सुविशुद्धस्तस्य संस्तारकः ॥ ३२ ॥ यो गौरवेण मत्तो नेच्छत्यालोचनां गुरोः सकाशे ।
आरोहति च संस्तारकं अविशुद्ध० ॥ ३३ ॥ यः पुनः पात्रभूतः करोत्यालोचनां गुरोः सकाशे । आरोहति च संस्तारकं सुविशुद्ध०
॥ ३४ ॥ यः पुनर्मलिनदर्शनः श्लथचारित्रः करोति श्रामण्यम् । आरोहति च संस्तारकं अविशुद्ध० ॥ ३५ ॥ यः पुनः शुद्धदर्शन आत्म-
चारित्रः करोति श्रामण्यम् । आरोहति च संस्तारकं सुवि० ॥ ३६ ॥ यो रागद्वेषरहितः त्रिगुप्तिगुप्तस्त्रिशल्यमदरहितः । आरोहति च
संस्तारकं सुवि० ॥ ३७ ॥ त्रिभिर्गौरवै रहितस्त्रिदण्डप्रतिमोचकः प्रथितकीर्त्तिः । आरोहति च संस्तारकं सुवि० ॥ ३८ ॥ चतुर्विध-

॥ ५५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संस्तारकस्य सुविशुद्धता-अविशुद्धतायाः कथनं

| आगम (२९) | “संस्तारक” - प्रकीर्णकसूत्र-६ (मूलं+संस्कृतछाया) ------------------------------------- मूलं [३९]------------------------------------- |
|---|---|
| प्रत सूत्रांक ॥३९॥ दीप अनुक्रम [३९] | |
| | संस्तारक-श्रमणस्य को लाभ? तत् कथ्यते |



हिओ निचं । आरुहइ० सुवि० ॥ ३९ ॥ ६२५ ॥ पंचमहव्वयकलिओ पंचसु समिईसु सुट्ठु आउत्तो । आरुहइ० सुवि० ॥ ४० ॥ ६२६ ॥ छक्काया पडिविरओ सत्तभयट्ठाणविरहिअमईओ । आरुहइ० सुवि० ॥ ४१ ॥ ६२७ ॥ अट्ठमयठाणजढो कम्मट्ठविहस्स खवणहेउत्ति । आरुहइ० सुवि० ॥ ४२ ॥ ६२८ ॥ नवबंभचेरगुत्तो उज्जुत्तो दसविहे समणधम्मे । आरुहइ० सुवि० ॥ ४३ ॥ ६२९ ॥ जुत्तस्स उत्तमट्ठे मलिअकसायस्स निव्वियारस्स । भण केरिसो उ लाभो संथारगयस्स समणस्स ? ॥ ४४ ॥ ६३० ॥ जुत्तस्स उत्तमट्ठे मलिअकसायस्स निव्वि- आरस्स । भण केरिसं च सुक्खं संथारगयस्स खमगस्स ? ॥ ४५ ॥ ६३१ ॥ पढमिल्लुगंमि दिवसे संथारग- यस्स जो हवइ लाभो । को दाणि तस्स सक्का अग्घं काउं अणग्घस्स ॥ ४६ ॥ ६३२ ॥ जो संखिज्जभवट्ठिई

कषायमथनश्चतसृभिर्विकथाभिर्विरहितो नित्यम् । आरोहति च संस्तारकं सुवि० ॥ ३९ ॥ पञ्चमहाव्रतकलितः पञ्चसु समितिषु सुष्ठा- युक्तः । आरोहति च संस्तारकं सुवि० ॥ ४० ॥ षड्भ्यः कायेभ्यः प्रतिविरतः सप्तभयस्थानविरहितमतिकः । आरोहति च संस्तारकं सुवि० ॥४१॥ त्यक्ताष्टमदस्थानः कर्मणोऽष्टविधस्य क्षपणहेतोरिति । आरोहति च संस्तारकं सुवि० ॥ ४२ ॥ नवब्रह्मचर्यगुप्त उद्युक्तो दश- विधे श्रमणधर्मे । आरोहति च संस्तारकं सुवि० ॥ ४३ ॥ युक्तस्योत्तमार्थे मर्दितकषायस्य निर्विकारस्य । भण कीदृशस्तु लाभः संस्तार- कगतस्य श्रमणस्य ? ॥ ४४ ॥ युक्तस्योत्तमार्थे मर्दितकषायस्य निर्विकारस्य । भण कीदृशं च सौख्यं संस्तारकगतस्य क्षपकस्य ? ॥ ४५ ॥ प्रथमे दिवसे संस्तारकगतस्य यो भवति लाभः । क इदानीं तस्य शक्तोऽर्घं कर्तुमनर्घस्य ? ॥ ४६ ॥ यः संख्येयभवस्थितिकं सर्वमपि स

Jain Education International For Personal & Private Use Only www.jainelibrary.org

---------------------------------------- मूलं [४७]----------------------------------------

प्रत सूत्रांक ||४७||

दीप अनुक्रम [४७]

५ तंदुलवे-चारिके ॥ ५६ ॥

संस्तारके सौख्यं

सव्वंपि खवेइ सो नहिं कम्मं । अणुसमयं साहुपयं साहू वुत्तो तहिं समए ॥४७॥६३३॥ तणसंथारनिसण्णोऽवि
मुणिवरो भट्ठरागमयमोहो । जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टीवि.? ॥ ४८ ॥ ६३४ ॥ तप्पु(नियपु०) रिस-
नाडयंमिवि न सा(जा)रई तह सहस्स(त्थ)वित्थारे। जिणवयणंमिवि सा ते हेउसहस्सोवगूढंमि ॥४९॥६३५॥
जं रागदोसमइअं सुक्खं जं होइ विसयमईयं च । अणुहवइ चक्कवट्टी न होइ तं वीअरागस्स ॥ ५० ॥ ६३६ ॥
मा होइ वासगणया न तत्थ वासाणि परिगणिज्जंति । बहवे गच्छं वुत्था जम्मणमरणं च ते खुत्ता ॥ ५१ ॥
॥ ६३७ ॥ पच्छावि ते पयाया खिप्पं काहिंति अप्पणो पत्थं । जे पच्छिमंमि काले मरंति संथारमारूढा ॥५२॥
॥ ६३८ ॥ नवि कारणं तणमओ संथारो नवि अ फासुआ भूमी । अप्पा खलु संथारो हवइ विसुद्धे चरि-
त्तंमि ॥ ५३ ॥ ६३९ ॥ निच्चंपि तस्स भावुज्जुअस्स जत्थ व जहिं व संथारो । जो होइ अहक्खाओ विहार-

---

क्षपयति तत्र कर्म । अनुसमयं साधुपदात् साधुरुक्तस्तत्र समये ॥ ४७ ॥ तृणसंस्तारकनिषण्णोऽपि मुनिवरो भ्रष्टरागमदमोहः । यत्
प्राप्नोति मुक्तिसौख्यं कुतस्तत् चक्रवर्त्यपि ? ॥४८॥ निजपुरुपनाटकेऽपि तथा स्वहस्तविस्तारे सा(या)रतिर्न । जिनवचनेऽपि सा ते हेतुसह-
स्रोपगूढे ॥ ४९ ॥ यद् रागद्वेपमयं सौख्यं यद् भवति विपयमयं च । अनुभवति चक्रवर्त्ती न भवति तद् वीतरागस्य ॥ ५० ॥ मा भूत्
वर्षगणका न तत्र वर्षाणि परिगण्यन्ते । बहवो गच्छे उपिता जन्ममरणयोस्ते निमग्नाः ॥ ५१ ॥ पश्चादपि ते प्रयाताः क्षिप्रं करिष्यन्त्या-
त्मनः पथ्यम् । ये पश्चिमे काले म्रियन्ते संस्तारकमारूढाः ॥ ५२ ॥ नैव कारणं तृणमयः संस्तारको नैव च प्रासुका भूमिः । आत्मा
खलु संस्तारको भवति विशुद्धे चारित्रे ॥ ५३ ॥ नित्यमपि तस्योद्युतभावस्य यत्र वा यदा वा संस्तारकः । यो भवति यथाख्यातो विहा-

॥ ५६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||५४||

दीप
अनुक्रम
[५४]


मब्भुट्ठि(त्तु)ओ लूहो ॥ ५४ ॥ ६४० ॥ वासारत्तंमि तवं चित्तविचित्ताइ सुट्ठु काऊणं। हेमंते संथारं आरुहइ सव्ववत्थासु ॥ ५५ ॥ ६४१ ॥ आसीअ पोअणपुरे अज्जा नामेण पुप्फचूलत्ति । तीसे धम्मायरिओ पविस्सुओ अन्निआउत्तो ॥ ५६ ॥ ६४२ ॥ सो गंगमुत्तरंतो सहसा उस्सारिओ अ नावाए । पडिवन्न उत्तिमट्ठं तेणवि आराहिअं मरणं ॥५७॥ ६४३ ॥ पंचमहव्वयकलिंआ पंचसया अज्जया सुपुरिसाणं । नयरंमि कुंभकारे कडगंमि निवेसिआ तइआ ॥ ५८ ॥ ६४४ ॥ पंचसया एगूणा वायंमि पराजिएण रुट्ठेणं । जंतंमि पावमइणा छुन्ना छन्नेण कम्मेण ॥५९॥ ६४५ ॥ निम्ममनिरहंकारा निअयसरीरेवि अप्पडीयद्धा। तेवि तह छुज्जमाणा पडिवन्ना उत्तमं अट्ठं ॥ ६० ॥ ६४६ ॥ दंडुत्ति विस्सुअजसो पडिमादसधारओ ठिओ पडिमं । जउणावंके नयरे सरेहिं विद्धो सयंगीओ ॥ ६१ ॥ ६४७ ॥ जिणवयणनिच्छिअमई निअयसरीरेऽवि अप्पडीबद्धो । सोऽवि तह विज्झमाणो

रमभ्युत्थितो रूक्षः ॥ ५४ ॥ वर्षारात्रे तपांसि चित्रविचित्राणि सुष्ठु कृत्वा । हेमन्ते संस्तारकमारोहति सर्वावस्थासु ॥ ५५ ॥ आसीच पोतनपुरे आर्या नाम्ना पुष्पचूलेति । तस्या धर्माचार्यः प्रविश्रुतोऽर्णिकापुत्रः ॥ ५६ ॥ स गङ्गामुत्तरन् सहसोत्सारितो नावश्च । प्रतिपन्न उत्तमार्थं तेनाप्याराद्धं मरणम् ॥ ५७ ॥ पञ्चमहाव्रतकलिताः पञ्च शतानि आर्याः सुपुरुषाणाम् । नगरे कुम्भकारे कटके निवेशितास्तदा ॥५८॥ पञ्च शतान्येकोनानि वादे पराजितेन रुष्टेन । यन्त्रेण पापमतिना हिंसिताः प्रच्छन्नकर्मणा ॥५९॥ निर्ममा निरहङ्कारा निजकशरीरेऽपि अप्रतिबद्धाः । तेऽपि तथा पील्यमानाः प्रतिपन्ना उत्तममर्थम् ॥ ६० ॥ दण्ड इति विश्रुतयशाः प्रतिमादशाधारकः स्थितः प्रतिमाम् । यमुनावके नगरे शरैर्विद्धः स्वयं गीतः ॥ ६१ ॥ जिनवचननिश्चितमतिर्निजकशरीरेऽप्यप्रतिबद्धः । सोऽपि तथा विध्यमानः प्रतिपन्न उत्त-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ संस्तारक (उत्तमार्थ)आराधक्स्य दृष्टान्ता:-(लघु कथा:) आरभ्यते

प्रत
सूत्रांक
||६२||

दीप
अनुक्रम
[६२]

५ तंदुलवैचारिके

॥ ५७ ॥

संस्तारकेण उत्तमार्थकारकाः

पडि० ॥ ६२ ॥ ६४८ ॥ आसी सुकोसलरिसी चाउम्मासस्स पारणादिवसे । ओरुहमाणो अ नगा खइओ मायाइ वग्घीए ॥ ६३ ॥ ६४९ ॥ धीधणिअबद्धकच्छो पच्चक्खाणम्मि सुट्ठु उवउत्तो । सो तहवि खज्जमाणो पडि० ॥ ६४ ॥ ६५० ॥ उज्जेणीनयरीए अवंतिनामेण विस्सुओ आसी । पाओवगमनिवन्नो सुसाणमज्झम्मि एगंतो ॥ ६५ ॥ ६५१ ॥ तिन्नि रयणीइ खइओ भल्लुंकी रुट्ठिया विकड्ढंती । सोवि तह खज्जमाणो पडि० ॥६६॥ ॥ ६५२ ॥ जल्लमलपंकधारी आहारो सीलसंजमगुणाणं । अज्जीरणो अ गीओ कत्तिअ अज्जो सुरवरं(णं)मि ॥ ६७ ॥ ६५३ ॥ रोहीडगंमि नयरे आहारं फासुअं गवेसंतो । कोवेण खत्तिएण य भिन्नो सत्तिप्पहारेणं ॥ ६८ ॥ ६५४ ॥ एगंतमणावाए विच्छिन्ने थंडिले चइअ देहं । सोऽवि तह भिन्नदेहो पडि० ॥ ६९ ॥ ६५५ ॥ पाडलिपुत्तंमि पुरे चंदयगुत्तस्स चेव आसीअ । नामेण धम्मसीहो चंदसिरिं सो पयहिऊणं ॥ ७० ॥ ६५६ ॥

---

ममर्थम् ॥ ६२ ॥ आसीत् सुकोशलर्षिः चतुर्मास्याः पारणकदिवसे । अवरोहन् नगात् खादितो मात्रा व्याघ्र्या ॥ ६३ ॥ गाढधृतिबद्धकक्षाकः प्रत्याख्याने सुष्ठु उपयुक्तः । स तथापि खाद्यमानः प्रतिपन्न उत्तममर्थम् ॥ ६४ ॥ उज्जयिनीनगर्यामवन्तिनाम्ना विश्रुत आसीत् । पादपोपगमनेन सुप्तः ( निषण्णः ) श्मशानमध्ये एकान्ते ॥ ६५ ॥ तिसृः रात्रीः खादितः शृगाल्या रुष्टया विकर्षयन्त्या । सोऽपि तथा खाद्यमानः प्रतिपन्न उत्तममर्थम् ॥ ६६ ॥ जल्लमलपङ्कधारक आधारः शीलसंयमगुणानाम् । अजीर्णवान् गीतार्थश्च कार्तिकार्यः सुरवणे ॥ ६७ ॥ रोहिडके नगरे आहारं प्रासुकं गवेषयन् । कोपेन च क्षत्रियेण भिन्नः शक्तिप्रहारेण ॥६८॥ एकान्तेऽनापाते विस्तीर्णे स्थण्डिले त्यक्त्वा देहम् । सोऽपि तथा भिन्नदेहः प्रतिपन्न उत्तममर्थम् ॥ ६९ ॥ पाटलीपुत्रे पुरे चन्द्रगुप्तकस्यैव आसीत् । नाम्ना धर्मसिंहश्चन्द्रश्रि-

॥ ५७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||७१||

दीप अनुक्रम [७१]

कुल्लउरंमि पुरवरे अह सो अब्भुट्ठिओ ठिओ धम्मे। कासीअ गिद्धपट्ठं पच्चक्खाणं विगयसोगो॥ ७१ ॥६५७॥
अह सोवि चत्तदेहो तिरिअसहस्सेहिं खज्जमाणो अ। सोऽवि तह० ॥ ७२ ॥ ६५८ ॥ पाडलिपुत्तंमि पुरे
चाणक्को नाम विस्सुओ आसी । सव्वारंभनिअत्तो इंगिणिमरणं अह निवन्नो ॥ ७३ ॥ ६५९ ॥ अणुलोमपूअ-
णाए अह से सत्तू जओ डहइ देहं । सो तहवि डज्झमाणो पडि० ॥ ७४ ॥ ६६० ॥ गुट्ठयपाओवगओ सुबं-
धुणा गोमये पलिवियंमि । डज्झंतो चाणक्को पडि० ॥ ७५ ॥ ६६१ ॥ काइंदीनयरीए राया नामेण अमयघो-
सुत्ति । तो सो सुअस्स रज्जं दाऊणं इह चरे धम्मे ॥ ७६ ॥ ६६२ ॥ आहिंडिऊण वसुहं सुत्तत्थविसारओ
सुअरहस्सो । काइंदिं चेव पुरिं अह पत्तो विगयसोगो सो ॥ ७७ ॥ ६६३ ॥ नामेण चंडवेगो अह से पडि-

---

यं(भार्यां) स प्रहाय ॥ ७० ॥ कोल्लपुरे नगरे अथ सोऽभ्युत्थितः स्थितो धर्मे । अकार्षीच्च गृद्धपृष्ठं प्रत्याख्यानं विगतशोकः ॥ ७१ ॥
अथ सोऽपि त्यक्तदेहस्तिर्यक्सहस्रैः खाद्यमानः । सोऽपि तथा खाद्यमानः प्रतिपन्न उत्तममर्थम् ॥ ७२ ॥ पाटलीपुत्रे पुरे चाणक्यो नाम्ना
विश्रुत आसीत् । सर्वारम्भनिवृत्त इङ्गिनीमरणमथ निषण्णः ॥ ७३ ॥ अनुलोमपूजनयाऽथ तस्य शत्रुर्दहति देहम् । स तथापि दह्यमानः
प्रतिपन्न उत्तममर्थम् ॥ ७४ ॥ गोष्ठे पादपोपगतः सुबन्धुना गोमये प्रदीपिते । दह्यमानश्चाणक्यः प्रतिपन्न उत्तममर्थम् ॥ ७५ ॥ काकन्द्यां
नगर्यां राजा नाम्नाऽमृतघोष इति । ततः स सुताय राज्यं दत्त्वा इहाचरन् धर्मम् ॥ ७६ ॥ आहिण्ड्य वसुधां सूत्रार्थविशारदः श्रुतर-
हस्यः । काकन्दीमेव पुरीमथ प्राप्तो विगतशोकः सः ॥ ७७ ॥ नाम्ना चण्डवेगोऽथ तस्य प्रतिच्छिनत्ति तकं देहम् । स तथापि छिद्य-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||७८||

दीप अनुक्रम [७८]

५ तंदुलवैचारिके ॥ ५८ ॥

संस्तारकेण उत्तमार्थकारकाः

छिंदइ तयं देहं। सो तहवि छिज्जमाणो पडिवन्नो० ॥ ७८ ॥ ६६४ ॥ कोसंबीनयरीए ललिअघडा नाम
विस्सुआ आसि। पाओवगमनिवन्ना बत्तीसं ते सुअरहस्सा ॥ ७९ ॥ ६६५ ॥ जलमज्झे ओगाढा नईइ पूरेण
निम्ममसरीरा। तहवि हु जलद्दहमज्झे पडिवन्ना० ॥ ८० ॥ ६६६ ॥ आसी कुलाणनयरे राया नामेण वेस-
मणदासो। तस्स अमच्चो रिट्ठो मिच्छद्दिट्ठी पडिनिविट्ठो ॥ ८१ ॥ ६६७ ॥ तत्थ य मुणिवरवसहो गणिपि-
डगधरो तहासि आयरिओ। नामेण उसहसेणो सुअसायरपारगो धीरो ॥ ८२ ॥ ६६८ ॥ तस्सासी अ गण-
हरो नाणासत्थत्थगहिअपेआलो। नामेण सीहसेणो वायंमि पराजिओ रुट्ठो ॥ ८३ ॥ ६६९ ॥ अह सो निरा-
णुकंपो अग्गिं दाऊण सुविहिअपसंते। सो तहवि डज्झ० ॥ ८४ ॥ ६७० ॥ कुरुदत्तोऽवि कुमारो सिंबलि-
फालिव्व अग्गिणा दड्ढो। सो तहवि डज्झ० ॥ ८५ ॥ ६७१ ॥ आसी चिलाइपुत्तो मुइंगुलिआहिं चालणिव्व

मानः प्रतिपन्न उत्तममर्थम् ॥ ७८ ॥ कोशाम्ब्यां नगर्यां ललितघटानामानो विश्रुता आसीरन्। पादपोपगमने निपण्णा द्वात्रिंशत्ते श्रुतर-
हस्याः ॥ ७९ ॥ जलमध्येऽवगाढा नद्याः पूरेण निर्ममाः शरीरे। तथापि जलह्रदमध्ये प्रतिपन्ना उत्तममर्थम् ॥ ८० ॥ आसीन् कुलाण-
(कुणाल) नगरे राजा नाम्ना वैश्रमणदासः। तस्यामात्यो रिष्टो मिथ्यादृष्टिः प्रतिनिविष्टः ॥ ८१ ॥ तत्र च मुनिवरवृषभो गणिपिटकधर-
स्तथाऽऽसीदाचार्यः। नाम्ना ऋषभसेनः श्रुतसागरपारगो धीरः ॥ ८२ ॥ तस्यासीच्च गणधरो गृहीतनानाशास्त्रार्थसारः। नाम्ना सिंह-
सेनो वादे पराजितो रुष्टः ॥८३॥ अथ स निरनुकम्पोऽग्निं दत्वा सुविहिते प्रशान्ते। स तथापि दह्यमानः प्रतिपन्नः उत्तममर्थम् ॥८४॥
कुरुदत्तोऽपि कुमारः शाल्मलीकाष्ठखण्ड इवाग्निना दग्धः। स तथापि दह्यमानः प्रतिपन्नः उत्तममर्थम् ॥ ८५ ॥ आसीत् चिलातिपुत्रः

॥ ५८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||८६||

दीप अनुक्रम [८६]

कओ। सो तहवि ख० ॥ ८६ ॥ ६७२ ॥ आसी गयसुकुमालो अल्लयचम्मं व कीलयसएहिं । धरणीअले उविद्धो तेणवि आराहिअं मरणं ॥ ८७ ॥ ६७३ ॥ मंखलिणावि य अरहओ सीसा तेअस्स उवगया दड्ढा । ते तहवि डज्झ० ॥ ८८ ॥ ६७४ ॥ परिजाणई तिगुत्तो जावज्जीवाइ सव्वमाहारं । संघसमवायमज्झे सागारं गुरुनिओगेणं ॥ ८९ ॥ ६७५ ॥ अहवा समाहिहेउं करेइ सो पाणगस्स आहारं । तो पाणगंपि पच्छा वोसिरइ मुणी जहाकालं ॥ ९० ॥ ६७६ ॥ खामेमि सव्वसंघं संवेगं सेसगाण कुणमाणो । मणवइजोगेहिं पुरा कयका-रिअअणुमए वावि ॥ ९१ ॥ ६७७ ॥ सव्वे अवराहपए एस खमावेमि अज्ज निस्सल्लो । अम्मापिऊसरिसया सव्वेऽवि खमंतु मह जीवा ॥ ९२ ॥ ६७८ ॥ धीरपुरिसपण्णत्तं सप्पुरिसनिसेविअं परमघोरं । धन्ना सिलाय-लगया साहंती उत्तमं अट्ठं ॥ ९३ ॥ ६७९ ॥ नारयतिरिअगईए मणुस्सदेवत्तणे वसंतेणं। जं पत्तं सुह-

पिपीलिकाभिश्चालनीव कृतः । स तथापि खाद्यमानः प्रतिपन्नः उत्तममर्थम् ॥ ८६ ॥ आसीद् गजसुकुमाल आर्द्रचर्मेव कीलकसहस्रैः । धरणितले उद्विद्धस्तेनाप्याराद्धं मरणम् ॥ ८७ ॥ मङ्खलिनाऽप्यर्हतः शिष्यौ तैजसोपगमनेन दग्धौ । तौ तथापि दह्यमानौ प्रतिपन्नावुत्त-ममर्थम् ॥ ८८ ॥ परिजानीते त्रिगुप्तो यावज्जीवतया सर्वमाहारम् । सङ्घसमवायमध्ये साकारं गुरुनियोगेन ॥ ८९ ॥ अथवा समाधि-हेतोः करोति पानकस्याहारम् । ततः पानकमपि पश्चात् व्युत्सृजति मुनिर्यथाकालम् ॥ ९० ॥ क्षमयामि सर्वसङ्घं संवेगं शेषाणां कुर्वन् । मनोवाग्योगैःपुरा कृतकारितानुमतीर्वापि ॥ ९१ ॥ सर्वाणि अपराधपदानि एष क्षमयामि अद्य निश्शल्यः । मातापितृसदृशाः सर्वेऽपि क्षाम्यन्तु मयि जीवाः ॥ ९२ ॥ धीरपुरुषप्रज्ञप्तं सत्पुरुषनिषेवितं परमघोरम् । धन्याः शिलातलगताः साधयन्त्युत्तममर्थम् ॥९३॥ नारकति-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आहार-पान-ममत्व त्याग, क्षमापना आदीनां वर्णनं

| आगम (२९) | “संस्तारक” - प्रकीर्णकसूत्र-६ (मूलं+संस्कृतछाया) ------------------------------------ मूलं [९४]------------------------------------ |
| --- | --- |

प्रत सूत्रांक ||९४||

दीप अनुक्रम [९४]

५ तंदुलवैचारिके

॥ ५९ ॥

दुक्खं तं अणुचिंते अणन्नमणो ॥ ९४ ॥ ६८० ॥ नरएसु वेअणाओ अणोवमाओ असायबहुलाओ । कायनिमित्तं पत्तो अणंतखुत्तो बहुविहाओ ॥ ९५ ॥ ६८१ ॥ देवत्ते मणुअत्ते पराभिओगत्तणं उवगएणं । दुक्खपरिकिलेसकरी अणंतखुत्तो समणुभूओ ॥ ९६ ॥ ६८२ ॥ तिरिअगइं अणुपत्तो भीममहावेअणा अणोअरया (यारा) । जम्मणमरणऽरहट्टे अणंतखुत्तो परिब्भमिओ ॥ ९७ ॥ ६८३ ॥ सुविहिअ! अईयकाले अणंतकालं तु आगयगएणं । जम्मणमरणमणंतं अणंतखुत्तो समणुभूओ ॥ ९८ ॥ ६८४ ॥ नत्थि भयं मरणसमं जम्मणसरिसं न विज्जए दुक्खं । जम्मणमरणायंकं छिंद ममत्तं सरीराओ ॥ ९९ ॥ ६८५ ॥ अन्नं इमं सरीरं अन्नो जीवत्ति निच्छयमईओ । दुक्खपरिकिलेसकरं छिंद ममत्तं० ॥ १०० ॥ ६८६ ॥ जावंति केइ दुक्खा सारीरा माणसा व संसारे । पत्तो अणंतखुत्तो कायस्स ममत्तदोसेणं ॥ १०१ ॥ ६८७ ॥ तम्हा सरीरमाइं सब्भिंतर-

---

र्यग्गत्योर्मानुष्यदेवत्वयोर्वसता । यत् प्राप्तं सुखदुःखं तदनुचिन्तयत्यनन्यमनाः ॥ ९४ ॥ नरकेषु वेदना अनुपमा असातबहुलाः । कायनिमित्तं प्राप्तोऽनन्तकृत्त्वो बहुविधाः ॥ ९५ ॥ देवत्वे मनुजत्वे पराभियोगत्वमुपगतेन । दुःखपरिक्लेशकरीरनन्तकृत्वः समनुभूतवान् ॥ ९६ ॥ तिर्यग्गतिमनुप्राप्तो भीमा महावेदना अनुत्तराः । जन्ममरणारघट्टेऽनन्तकृत्वो( वेदयन् ) परिभ्रान्तः ॥ ९७ ॥ सुविहित ! अतीतकालेऽनन्तकालं तु गतागताभ्यां । जन्ममरणमनन्तमनन्तकृत्वः समनुभूतवान् ॥ ९८ ॥ नास्ति भयं मरणसमं जन्मसदृशं न विद्यते दुःखम् । जन्ममरणातङ्कं छिन्द्धि ममत्वं शरीरात् ॥ ९९ ॥ अन्यदिदं शरीरमन्यो जीव इति निश्चयमतिकः । दुःखपरिक्लेशकरं छिन्द्धि ममत्वं शरीरात् ॥ १०० ॥ यावन्ति कानिचिद् दुःखानि शारीराणि मानसानि वा संसारे । प्राप्तोऽनन्तकृत्वः कायस्य ममत्वदोषेण ॥ १०१ ॥ तस्मात्

आहार-त्यागः क्षामणं ममत्व-त्यागः

॥ ५९ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यत्व, संसार आदि भावना वर्णयते

प्रत सूत्रांक ||१०२||

दीप अनुक्रम [१०२]

बाहिरं निरवसेसं । छिंद ममत्तं सुविहिअ! जइ इच्छसि उत्तमं ठाणं ॥ १०२ ॥ ६८८ ॥ जगआहारो संघो सव्वो मह खमउ निरवसेसंपि । अहमवि खमामि सुद्धो गुणसंघायस्स संघस्स ॥ १०३ ॥ ६८९ ॥ आयरिअ उवज्झाए सीसे साहम्मिए कुलगणे य । जे मे केइ कसाया सव्वे तिविहेण खामेमि ॥ १०४ ॥ ६९० ॥ सव्वस्स समणसंघस्स भयवओ अंजलिं करिअ सीसे । सव्वं खमावइत्ता अहमवि खामेमि सव्वस्स ॥ १०५ ॥ ६९१ ॥ सव्वस्स जीवरासिस्स भावओ धम्मनिहिअनिअचित्तो । सव्वं खमावइत्ता अहयंपि खमामि सव्वेसिं ॥ १०६ ॥ ॥ ६९२ ॥ इअ खामिआइआरो अणुत्तरं तवसमाहिमारूढो । पप्फोडंतो विहरइ बहुविहवाहाकरं कम्मं ॥ १०७ ॥ ६९३ ॥ जं बद्धमसंखिज्जाहिं असुभभवसयसहस्सकोडीहिं । एगसमएण विहुणइ संथारं आरुहंतो य ॥ १०८ ॥ ६९४ ॥ इअ (ह) तह विहारिणो से विग्घकरी वेअणा समुट्ठेइ । तीसे विज्झवणाए अणुसट्ठिं

---

शरीरादौ साभ्यन्तरे बाह्ये निरवशेषे । छिन्द्धि ममत्वं सुविहित ! यदीच्छसि उत्तमं स्थानम् ॥ १०२ ॥ जगदाधारः सङ्घः सर्वः क्षाम्यतु मम निरवशेषमपि । अहमपि क्षमयामि शुद्धो गुणसंघाते सङ्घे ॥ १०३ ॥ आचार्यान् उपाध्यायान् शिष्यान् साधर्मिकान् कुलगणान् । ये मया कषायिताः सर्वान् त्रिविधेन क्षमयामि ॥ १०४ ॥ सर्वस्य श्रमणसङ्घस्य भगवतोऽञ्जलिं कृत्वा शीर्षे सर्वं क्षमयित्वा अहमपि क्षमयामि सर्वस्य ॥ १०५ ॥ सर्वस्य जीवराशेर्भावतो धर्मे निहितनिजचित्तः । सर्वं क्षमयित्वा अहमपि क्षाम्यामि सर्वस्य ॥ १०६ ॥ इति क्षमितातिचारोऽनुत्तरं तपःसमाधिमारूढः । बहुविधबाधाकरं कर्म प्रस्फोटयन् विहरति ॥ १०७ ॥ यद् बद्धमसंख्येयाभिरशुभभवशतसहस्रकोटीभिः । एकसमयेन विधुनाति संस्तारकमारोहन्नेव ॥ १०८ ॥ इह तथाविहारिणस्तस्य विघ्नकरी वेदना

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ उत्तमार्थ-आराधना-पूर्व आचरणियविधिः कथ्यते

प्रत सूत्रांक ||१०९||

दीप अनुक्रम [१०९]

६ संथारय-पइण्णयं

|| ६० ||

विंति निज्जवया ॥ १०९ ॥ ६९५ ॥ जइ ताव ते मुणिवरा आरोविअवित्थरा अपरिकम्मा । गिरिपब्भार
विलग्गा बहुसावयसंकडं भीमं ॥ ११० ॥ ६९६ ॥ धीधणिअबद्धकच्छा अणुत्तरविहारिणो समक्खाया ।
सावयदाढगयाविहु साहंती उत्तमं अट्ठं ॥ १११ ॥ ६९७ ॥ किं पुण अणगारसहायगेहिं धीरेहिं संगयम-
णेहिं । नहु नित्थरिज्जइ इमो संथारो उत्तमं अट्ठं ॥ ११२ ॥ ६९८ ॥ उच्छूढसरीरघरा अन्नो जीवो सरीरम-
न्नंति । धम्मस्स कारणे सुविहिआ सरीरंपि छड्डुंति ॥ ११३ ॥ ६९९ ॥ पोराणिअ पच्चुप्पन्निआ उ अहिआसि-
ऊण विअणाओ । कम्मकलंकलवल्लीं विहुणइ संथारमारूढो ॥ ११४ ॥ ७०० ॥ जं अन्नाणी कम्मं खवेइ बहु-
आहिं वासकोडीहिं । तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥ ११५ ॥ ७०१ ॥ अट्ठविहकम्ममूलं बहु-
एहिं भवेहिं संचिअं पावं । तं नाणी० ॥ ११६ ॥ ७०२ ॥ एवं मरिऊण धीरा संथारंमि उ गुरु पसत्थंमि ।

---

समुत्तिष्ठति । तस्या विध्यापनायानुशास्ति ददति निर्यापका गीतार्थाः ॥ १०९ ॥ यदि तावत् ते मुनिवरा आरोपितविस्तरा अपरिकर्माणः ।
गिरिप्राग्भारं विलग्ना बहुश्वापदसंकटं भीमम् ॥ ११० ॥ बाढंधृतिबद्धकक्षाकाः अनुत्तरविहारिणः समाख्याताः । श्वापददंष्ट्रागता अपि
साधयन्त्येवोत्तममर्थम् ॥ १११ ॥ किं पुनरनगारसहायकैर्धीरैः संगतमनोभिः । नैव निस्तीर्यतेऽयं संस्तारक उत्तममर्थमाश्रित्य ॥ ११२ ॥
त्यक्तशरीरगृहा अन्यो जीवः शरीरमन्यदिति । धर्मस्य कारणात् सुविहिताः शरीरमपि त्यजन्ति ॥११३॥ पौराणिकीः प्रत्युत्पन्ना अध्यास्य
वेदनाः । कर्मकलङ्कवल्लीं विधुनाति संस्तारकमारूढः ॥ ११४ ॥ यदज्ञानी कर्म क्षपयति बहुकाभिर्वर्षकोटीभिः । तद् ज्ञानी तिसृभिर्गुप्तः
क्षपयत्युच्छ्वासमात्रेण ॥ ११५ ॥ अष्टविधकर्ममूलं बहुकैर्भवैः संचितं पापम् । तद् ज्ञानी तिसृभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥११६॥ एवं

कृतसंस्तारकस्य अनुशास्तिः

|| ६० ||

Jain Education International For Personal & Private Use Only www.jainelibrary.org

संस्तारकस्य (उत्तमार्थ-आराधकस्य) प्राप्त आराधना-फ़लम्

प्रत सूत्रांक ||११७||

दीप अनुक्रम [११७]

तइअभवेण व तेण व सिज्झिज्जा खीणकम्मरया ॥ ११७ ॥ ७०३ ॥ गुत्तीसमिइगुणड्ढो संजमतवनिअमक-
रणकयमउडो । सम्मत्तनाणदंसणतिरयणसंपाविअसमग्घो ( महग्घो ) ॥ ११८ ॥ ७०४ ॥ संघो सइंदयाणं
सदेवमणुआसुरम्मि लोगम्मि । दुल्लहतरो विसुद्धो सुविसुद्धो तो महामउडो ॥ ११९ ॥ ७०५ ॥ डज्झंतेणवि
गिम्हे कालसिलाए कवल्लिभूआए । सूरेण व चंडेण व किरणसहस्संपयंडेणं ॥ १२० ॥ ७०६ ॥ लोगविजयं
करिंतेण तेण झाणोवउत्तचित्तेणं । परिसुद्धनाणदंसणविभूइमंतेण चित्तेणं ॥ १२१ ॥ ७०७ ॥ चंदगविज्झं
लद्धं केवलसरिसं समाउ परिहीणं । उत्तमलेसाणुगओ पडिवन्नो उत्तमं अट्ठं ॥ १२२॥७०८ ॥ एवं मए अभि-
थुआ संथारगइंदखंधमारूढा । सुसमणनरिंदचंदा सुहसंकमणं सया दिंतु ॥ १२३ ॥ ७०९ ॥ संथारगपइण्णयं
सम्मत्तं ॥ ६ ॥

मृत्वा वीराः संस्तारके गुरुभिः प्रशंसिते । तृतीयभवेन वा तेन वा सिध्यन्ति क्षीणकर्मरजसः ॥ ११७ ॥ गुप्तिसमितिगुणाढ्यः
संयमतपोनियमकरणकृतमुकुटः । सम्यक्त्वज्ञानदर्शनत्रिरत्नसंप्रापितसमर्घत्वः ॥ ११८ ॥ सङ्घः सेन्द्रे सदेवमनुजासुरे लोके । दुर्लभतरो
विशुद्धः सुविशुद्धस्ततो महामुकुटः ॥ ११९ ॥ दह्यमानेनापि ग्रीष्मे कृष्णशिलायां कटाहभूतायाम् । सूर्येण वा चण्डेन किरणसहस्रप्रच-
ण्डेन ॥ १२० ॥ लोकविजयं कुर्वता तेन ध्यानोपयुक्तचित्तेन । परिशुद्धज्ञानदर्शनविभूतिमता चित्तेन ॥ १२१ ॥ चन्द्रावेध्यकं लब्धं
केवलसदृशं साम्येनापरिहीणम् । उत्तमलेश्यानुगतः प्रतिपन्न उत्तममर्थम् ॥ १२२ ॥ एवं मयाऽभिष्टुताः संस्तारकगजेन्द्रस्कन्धमारूढाः ।
सुश्रमणनरेन्द्रचन्द्राः सुखसंक्रमणं सदा ददतु ॥ १२३ ॥ इति संस्तारकप्रकीर्णकम् ॥ ६ ॥

च. स. ११

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुनिश्री दीपरत्नसागरेण पुन: संपादित: (आगमसूत्र २९)

"संस्तारक" परिसमाप्त:

**नमो नमो निम्मलदंसणस्स**

पूज्य आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नम:

**29**

पूज्य आगमोध्धारक आचार्य श्री सागरानंदसूरीश्वरेण संशोधित: संपादितश्च

**“संस्तारक-प्रकीर्णकसूत्र”** [मूलं एवं छाया:]

**(किंचित् वैशिष्ठ्यं समर्पितेन सह)**

# मुनि दीपरत्नसागरेण पुन: संकलित:

**“संस्तारक” मूलं एवं संस्कृतछाया:” नामेण**

# परिसमाप्त:

Remember it’s a Net Publications of ‘jain_e_library’s’